International Journal of Sanskrit Research 2020; 6(1): 238-241

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 238-241
© 2020 IJSR
www.anantaajournal.com
Received: 15-11-2019
Accepted: 21-12-2019

**डा. सुशान्तकुमारराजः**
सहाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्(मा.वि)
श्रीसदाशिवपरिसरः, पुरी, ओड़िशा, भारत

**Corresponding Author:**
**डा. सुशान्तकुमारराजः**
सहाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्(मा.वि)
श्रीसदाशिवपरिसरः, पुरी, ओड़िशा, भारत

# संस्कृतसाहित्ये नारीणां महत्त्वसमीक्षणम्

**डा. सुशान्तकुमारराजः**

**प्रस्तावना**

संस्कृतभाषासाहित्यं भवति समृद्धतमं साहित्यम् । वैदिककालाद् आरभ्य इदानीं पर्यन्तं संस्कृतभाषया यानि संस्कृतिसम्पन्नानि पुस्तकानि निरवच्छिन्नतया विरचितानि सन्ति, न तावतानि अन्यासु भाषासु सम्भावयितुमपि शक्यते। संस्कृतभाषावद् भारतीया संस्कृतिरपि विश्वस्य सर्वप्रधाना संस्कतिरूपेण परिचीयते । अतः समग्रेऽस्मिन् जगति भारतवर्षमिदं संस्कृतसाहित्यसम्पन्नसनातनधर्मधारकत्वेन नितरां मूर्धन्यभूतं स्थानं भजते । भारतीयसंस्कृतौ यद्यपि सर्वेषामेव जनानां कृते समानाधिकारस्य व्यवस्था वर्तते, तथापि तत्र नारीणां महत्वं समधिकम् अङ्गीक्रियते । 'नारी' इति शब्दस्य व्युत्पत्तिः 'न अरिः नारी' इति रूपेण क्रियते, यस्यार्थो भवति या न कस्यापि अरिः भवितमर्हति सा एव नारी इति कथ्यते । अतः नारी कमलाङ्गी, गृहिणी, गृहस्वामिनी, सहधर्मिणी इत्यादिभिः विशेषणैः सम्बोध्यते । गृहस्थाश्रमे तु नार्यः प्राधान्यं दरीदृश्यते । तस्याः अभावे गृहं न कदाऽपि गृहमिवाभाषते । अतः उच्यते– न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते [1] इति । संस्कृतसाहित्ये नारीणां महत्वं वेदेषु धर्मशास्त्रेषु पुराणेतिहासकाव्यादिषु च वर्णितं प्राप्यते । प्रबन्धप्रतिज्ञानुरोधेनात्र तत्तत् शास्त्राधारेण सारसंक्षेपेण नारीणां महत्त्वं समीक्ष्यते ।

जन्मनः विवाहकालं यावत् पितुः गृहे सा 'कन्या' इति पवित्रशब्देन सम्बोद्ध्यते । विवाहानन्तरं पत्नीरूपेण सा एव पतिगृहं गत्वा गृहस्वामिनीपदम् अलंकरोति । गृहस्य सर्वविधकर्मणि निपुणा भूत्वा सर्वेषां प्रिया भवति । तदेवोच्यते च वैदिकसाहित्ये-

> साम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रवां भव ।
> ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु [2] ॥ इति ।

नारी समाजस्य आधारशीला विद्यते । पुरुवत् नारीणामपि समानाधिकारो वर्तत इति वेदाः निर्दिशन्ति । पुरुषेण सह सा जज्ञकर्मणि यथा अंशग्रहणं करोति तथैव समरभूमौ अपि सेनापतित्वं कर्तुमपि समर्था भवति । यथोक्तम् –

> संहोत्रं स्म पुरा नारी समनं वाव गच्छति [3] इति ।

प्राचीनकाले नार्यः युद्धक्षेत्रं गत्वा ताषां पराक्रमं प्रदर्शितवत्यः । भरतस्य मातुः कैकेयीदेव्याः रणकौशलं सुविदितमेव । भारतस्वतन्त्रतासंग्रामे राज्ञी लक्ष्मीबाई, जीजीबाईप्रभृतयो नार्यः स्वकीयरणकौशलबलेन विश्वविख्याता अभवन् । वैदिकयुगे नारी सुवीरा, शुरपत्नी, इन्द्रपन्तीत्यादिभिः पदैः उद्घुष्यते स्म । यथा –

> आवीरामिव मामयं शरारुरभि मन्यते। उताहमस्मि वीराणीन्द्रपत्नी [4] इति ।

आधुनिककालवत् वैदिके युगेऽपि स्त्रीशिक्षायाः महत्त्वपूर्णं स्थानमासीत् । वेदाध्ययनेऽपि तासां समानाधिकारोऽङ्गीक्रियते स्म । इयं शिक्षा यथा नराणां हितसाधिका तथैव नारीणामपीति ऋग्वेदे उल्लेखो वर्तते । अतः ताषां शिक्षाविषये समाजः अतीव जागरूकः आसीत् । प्राचीने काले विदुषीनारीरूपेण अनसूया-देवहूति-शची-गोधा-यमी-घोषा-उर्वशी-गार्गी-मैत्रेयी-अदिति-सावित्री-कौसल्या-सीता-तारा-मन्दोदरी-कुन्ती-अहल्यादीनां नामानि समागच्छन्ति ।

धर्मशास्त्रेषु नरीणां वैशिष्ट्यवर्णनं नितरां दरीदृस्यते । यतो हि धर्म एव पारस्परिकविश्वाससंधानात् प्रजानां धारकः । धर्मस्य विश्वजनीनत्वं, सार्वलौकिकत्वं सार्वभौमिकत्वं च विश्वहितसम्पादनादेव प्रवर्त्तते । धर्म एव शिक्षयति 'उदारचरितानां तु वसुधैव कुटुम्बकम्' । सत्य-दया-परोपकारादयो धर्मस्य मूलतत्त्वानि गण्यन्ते । एवमवलोक्यते यद् जीवने धर्मस्य सर्वदा सर्वथा चानिवार्यत्वं वर्त्तते । तस्याश्रयेणैव ऐहिकम् आमुष्मिकं च सुखमवाप्यते । धर्मो जीवनरक्षकः, सुखशान्तिसंधायकः सत्कर्मप्रेरकः

दुःखनिरोधकश्चेति सततं स आश्रयणीयः। धर्मशास्त्रशब्दो धर्मं शास्तीति व्युत्पत्या सामान्येन बोध्यते । किञ्च धर्मप्रतिपादकशास्त्रं धर्मशास्त्रमिति मध्यपदलोपिकर्मधारयसमासेन धर्मशास्त्रयोर्मध्ये प्रतिपाद्यप्रतिपादकभावोऽपि कैश्चित् स्वीक्रियते।

विदितमिदं यत् सकलवेदानाम् अनुमापकत्वेन, मुनिप्रणीतत्वेन, तदध्ययनानुष्ठानवताम्, ऐहिकामुष्मिकफलप्रापकत्वेन, पुरुषाणामुपादेयत्वेन, सकलशास्त्रललामभूतत्वेन प्रधानपुरुषार्थस्य धर्मस्य प्रतिपादकत्वेन प्राचीनत्वेन च धर्मशास्त्रं विराजतेतराम्। अस्यैव धर्मशास्त्रस्य संज्ञा भवति स्मृतिरिति। यथोक्तं मनुना-

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः[5] इति।

अनेन वचनेन स्मृतेर्धर्मशास्त्रमिति संज्ञान्तरम्। श्रुतिशास्त्रस्या-पौरुषेयत्वेन न तदर्थस्मारकतया तदुद्भवानामन्येषां व्याकरण-सांख्य-गृह्यसूत्र-पुराणादीनां शास्त्रान्तराणां च स्मरणयोग्यसामान्यात् यद्यपि स्मृतिसंज्ञा यौगिकी तथापि धर्मशास्त्रस्यास्य स्मृतिरिति संज्ञा पङ्कजादिवत् योगरूढा । भारतीयसंस्कृतेरनुशीलनेन विज्ञायते यत्- स्मृतिशास्त्राणि सर्वप्राचीनतमानि आर्यजुष्टानि चेति सर्वैः स्वीक्रियन्ते। स्मृतिषु मनुस्मृतियाज्ञवल्क्यस्मृत्यादयः प्रसिद्धाः सन्ति, स्मृतिकारेषु मनुयाज्ञवल्क्यपराशरव्यासादयः स्मृतिकारा अपि सुप्रसिद्धाः, यतो याज्ञवल्क्येनोक्तम्—

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः[6] इति।

धर्मशास्त्रं मुख्यतया भारतीयधर्मशास्त्रकारैर्भागत्रयेण विभक्तम्। तदेव स्मृतिः, सूत्रं निबन्धश्चेति। यद्यपि केषाञ्चिदर्वाचीनपण्डितानां मतानुसारं भाष्यमित्यपरं मन्यते तथापि निबन्धेषु तस्यान्तर्भावाद्भिन्नतया नैवावगण्यते । याज्ञवल्क्यमनुबौधायनपैठीनसिकमलाकरभट्टादिभिः स्मृतीनां संख्या भिन्नभिन्नरूपेण कथिता। एतेन स्मृतिकाराणां संख्याविषये वैमत्यं परिलक्ष्यते। पराशरमतानुसारं स्मृतीनां प्राधान्यं युगानुसारमस्ति। यथा-

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः।<br>
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः[7]॥ इति।

संस्कृतसाहित्यजगति स्मृतिसाहित्यं सर्वप्राचीनमार्यजुष्टञ्चेति प्रायशः सर्वैः स्वीक्रियते। तत्र सर्वेषु क्षेत्रेषु नारीणां स्थानं कीदृशमासीत्तदेव आलोचनीयमस्ति। स्मृतीषु नारीणां स्थानमित्यालोचनावसरे स्मृतीनां मनुस्मृतेः प्राधान्यादेव तत्रापि नारीणां स्थानस्य सर्वोत्कृष्टप्रतिपादनादेव विशेषतया मनुमत-माधारीकृत्यालोच्यते। नारीणां सृष्टेरारभ्य अन्त्येष्टिक्रियां यावत् आचार-व्यवहार-प्रायश्चित्तेषु सर्वोत्कृष्टं स्थानं परिलक्ष्यते स्म। तासां समादरोऽपि क्रियते स्म। नारीसृष्टिविषये मनुस्मृतेः प्रथमाध्याये सृष्टिप्रकरणे महर्षिणा मनुना एवमुक्तम्—

द्विधा कृत्वाऽऽत्मनो देहमर्धेन पुरुषोऽभवत्।<br>
अर्धेन नारी तस्यां च विराजमसृजत्प्रभुः॥[8] इति।

भाष्यकारेण कुल्लूकेन इत्थमर्थः कृतो यत्- स ब्रह्मा निजदेहं द्विखण्डं कृत्वा अर्धेन पुरुषो जातोऽर्धेन स्त्री। तस्यां मैथुनधर्मेण विराजं पुरुषं सृष्टवानिति। अस्मादेव वचनाज्ज्ञायते स्मृतिषु नारीणां सृष्टिविषये भगवतः कीदृशो मनोभावो यश्च भगवता मनुना प्रतिपादितः। मनुनापि नारीणां नामकरणविषये एवमेवोक्तम्—

स्त्रीणां सुखोद्यमक्रूरं विष्पष्टार्थं मनोहरम्।<br>
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्॥[9] इति।

अत्र नामकरणसंस्कारेऽपि पुरुषाणामिव स्त्रीणामपि महत्त्वपूर्णं स्थानमस्तीति तेन प्रत्यपादि। एवमेवोपनयनसंस्कारचर्चावसरे महर्षिणा याज्ञवल्क्येनोक्तम्—

मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्[10] इति।

अनेन वचनेन जन्मविषये पितुरपेक्षया मातुः प्राधान्यमर्थान्नारीणां महत्त्वमपि प्रतिपादितम्। उपनयनसंस्कारस्य भिक्षाटनप्रसङ्गेऽपि नारीणां स्थानं सर्वप्रथममस्ति यतो स्मृतिकारेण मनुनोक्तम्—

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्।<br>
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्॥[11] इति।

विवाहविधिमाधारीकृत्य मनुनोच्यते यत्—

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।<br>
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया॥[12]

अर्थाद्विवाहविधिरेव स्त्रीणां वैदिकः संस्कार उपनयनाख्यः स्मृत इति मन्वादीनामभिप्रायः। पतिसेवैव गुरुकुले वासो वेदाध्ययनरूपः। गृहकृत्यमेव सायंप्रातः समिद्धोमरूपोऽग्निपरिचर्या। गौतमोऽपि स्नानं सहधर्मचारिणीसंयोग इति वदति। कन्यादातृक्रमविषयेऽपि नारीणां स्थानमस्ति। यथा याज्ञवल्क्येनोक्तम्—

पिता पितामहो भ्राता सकुल्यो जननी तथा।<br>
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥[13] इति।

अत्र कन्यादातृषु जनन्याः स्थानमपि प्राप्यते। नारी वयोवस्थाभेदेन तस्याः कार्यकुशलतामाधारीकृत्य गौरी, कन्या, कुमारी, स्त्री, नारी, भार्या, पत्नीप्रभृतिभिः शब्दैरुच्यते।

नार्य भागद्वयेन विभक्ताः। अनन्यपूर्वा अन्यपूर्वाश्चेति। अनन्यपूर्वाः प्रशंसिताः, अन्यपूर्वाश्च निन्दिताः । येन याज्ञवल्क्येन अनन्यपूर्विकाणां स्त्रीणां स्थानमादरणीयमिति प्रतिपादितम्। सुशृङ्खलितसमाजं या नार्यः नाशयन्ति स्म, तासां कृतेऽपि दण्डविधानमस्ति। यथा चोक्तं याज्ञवल्क्येन—

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम्।<br>
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्॥[14] इति।

किञ्च नारीणां शुद्धिविषये यदेव स्थानं स्मृतिषु प्राप्यते तदेव यथा-परिणयनात्पूर्वं सोम-गन्धर्व-वह्न्यः स्त्रीर्भूक्त्वा यथाक्रमं तासां कृते शौचमधुरवचनसर्वमेध्यत्वानि दत्तवन्तः। तस्मात् स्त्रियः सर्वत्र स्पर्शालिङ्गनादिषु मेध्याः शुद्धाश्च स्मृताः। यथोक्तं याज्ञवल्क्येन—

'सोमः शौचं ददावासां गन्धर्वश्च शुभां गिरम्।<br>
पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः॥[15]

ताभिः सह सम्भाषणसमयेऽपि कथं शब्दान् व्यवहरेत् इत्यपि मनुना प्रतिपादितम्—

परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः।<br>
तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च॥[16] इति।

मातृष्वस्रादयो गुरुपत्नीवत्प्रत्युत्थानाभिवादनादिभिः सम्पूज्याः। पूजनीयासु माता पूज्यतमा। एवंभूता या नारी सा पतिव्रता स्यान्न च पत्या विरोधमाचरेत्। मधुमतीवाचमुदीरयेत्। पत्युरनुव्रता स्यात्। पतिपरिवारार्थं मङ्गलकारिणी शुश्रूषापरायणी सुखदा च स्यादिति स्मृतिषु वचनान्युपलभ्यन्ते। यत्र दम्पत्योरानुकूल्यं तत्र त्रिवर्गो वर्धत इति विज्ञानेश्वरस्याशयः । स्मृतिषु नारीणां कृते बहून्युपदेशपरकवचनानि प्राप्यन्ते। यथा-

मृते जीवति वा पत्यौ या नान्यमुपगच्छति।
सेह कीर्त्तिमवाप्नोति मोदते चोमया सह॥[17] इति।

पुनश्च आज्ञासम्पादिनीम्, दक्षाम्, पुत्रवतीं प्रियवादिनीं च यः त्यजति स राज्ञे स्वधनस्य तृतीयांशं दण्डरूपेण दद्यात्। स्मृतिषु मनुस्मृतौ नारीणां स्थानमत्युत्कृष्टत्वेन प्रतिपाद्यते। तत्रापि याज्ञवल्क्यस्मृतौ स्त्रीधर्मप्रसङ्गे स्त्रीभिः सदा भर्तृवचः कार्यम्, यतो हि अयमेव तासामुत्कृष्टधर्मत्वेन निगदितः।

स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः॥[18]

श्राद्धप्रसङ्गेऽपि उदकदानसपिण्डीकरणादिषु नारीणां स्थानं स्मृतिष्वागच्छति। यथा –

'मातामहानामप्येवं दद्यादाचमनं ततः॥[19] इति।

अर्थान्मातामहानामपि विश्वेदेवावाहनादिपिण्डदानपर्यन्तं कर्मैवमेव कर्त्तव्यमिति याज्ञवल्क्यवचनतो ज्ञायते।

एतत्सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि॥[20] इति।

इत्थं व्यवहाराध्याये दायहरक्रमप्रसङ्गेऽपि नारीणामधिकारप्रसङ्गः स्मृतिषु प्राप्यते। यथा- मातृपत्नीकन्याभगिनीस्नुषादासीभुजिष्यादीनामधिकारविषयिणी चर्चाऽपि सम्यक्तया मनुयाज्ञवल्क्यनारदादिस्मृतिषु लभ्यते। अप्रजपुंधनहरणप्रसङ्गे 'पत्नीदुहितरश्चैव' इत्यनेन वचनेन नारीणां स्थानं दायहरक्रमे उल्लिखितम्। मनु-वृद्धविष्णु-कात्यायन-हारीत-बृहस्पति-नारदादिभिः स्मृतिषु नारीणां चर्चा कृता। सवर्णभ्रातृविभागप्रसङ्गेऽपि स्मृतिषु नारीणां स्थानविचारदशायामेव-मेवावलोक्यते यत् पिता यदा ज्येष्ठस्य विंशोद्धारादिकं कृत्वा विभजेदथवा सर्वानेव समानंशान् कुर्यात्तदा जीवन्तीनामलब्धस्त्रीधनानां पत्नीनामपि तज्जातीयपुत्रांशसमांशं दद्यात्। किञ्चापि पितर्यूर्ध्वं गते विभजद्भिः भर्तृभिरसंस्कृता भगिन्यः संस्कर्त्तव्या इति मिताक्षराकारस्याभिमतमस्ति। पुनश्च सोदरभ्रातृविभागे माताऽपि पुत्रसमांशं गृवीयादिति समांशहारिणी मातेति वचनादवगम्यते।
अविभाज्यधनप्रसङ्गेऽपि मातापित्रोर्द्रव्याविरोधेन मैत्रेणोद्वाहादिना यद्धनं स्वयमर्जितं तदेव सर्वमविभाज्यमिति बहुवचनानि याज्ञवल्क्यमनु-कात्यायननारदबृहस्पत्यादिस्मृतिष्वपि लभ्यन्ते। यथा नारदः–

भ्रात्रा च स्वधनं दत्तं यस्यै स्यात्प्रीतिपूर्वकम्।
तस्याप्येष विधिर्दृष्टो माताऽपीष्टे यथा पिता॥[21]

विभागसन्देहे निर्णयहेतुप्रसङ्गेऽपि ज्ञातिभिः पितृबन्धुभिः मातृबन्धुभिः विभागः कार्य इति मातृशब्दस्य प्रयोगात् ज्ञायते यत् नारीणां स्थानं स्मृतिस्थविषयेषु सर्वत्रैव प्राप्यते। उत्तराधिकारप्रसङ्गे परिवारे स्त्रीणां स्वत्वाधिकारस्तथा नासीदिति यद्यपि मनुवचनादवगम्यते, तथापि विशेषवचनबलेनैव साधारणस्यार्थस्य खण्डनमेव व्याख्यया भवेदित्याशयो मनुवचनादवगम्यते।

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥[22] इति।

किञ्च ताषां नारीणां सर्वकालिकसुरक्षा कर्तव्या इति शास्त्रं निर्दिशति। ताषां स्वतन्त्रतामाधारीकृत्य मनुनापि उक्तम्-

पिता रक्षति कौमारे भर्ता रक्षति यौवने।
रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति॥[23] इति।

अत्रायं प्रश्नः समुदेति किं नार्या एतत् स्वातन्त्र्यं समाजदेशयोः पक्षे मङ्गलकरम्? अत्र मतद्वयं प्राप्यते। रक्षणशीलगोष्ठी कथयति एतत् नार्या यथेच्छाचारकर्मणि साहाय्यं करोति। हिन्दुसमाजस्य सुखं शान्तिं च विपन्नं करोति। परन्तु प्रगतिवादिनः स्वागतं कुर्वन्ति। उभयोरुचितानुचितविचारः कष्टसाध्यः यत उभयोर्महत्त्वं समाजे परिलक्ष्यते। पोष्यपुत्रग्रहणप्रसङ्गेऽपि मनोर्मतम्–

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥[24] इति।

अत्र व्यवहारमयूखकारनीलकण्ठस्य मतानुसारं वा शब्दान्मात्रभावे पितैव दद्यात्, पित्रभावे मातैव। उभयसत्वे तूभाविति तस्याशयः। तत्रापि दायभाग-कारजीमूतवाहनेनापि सधनानिर्धनाविषयं नोटङ्क्य पिण्डदातृत्वानुसारमेव स्त्रीणां धनाधिकारः प्रदर्शितः। पितरौ धनभाजौ इत्यत्र प्रसङ्गे सहस्रं तु पितृन् माता गौरवेणातिरिच्यते' इति मनुवचनमाश्रित्य पितुरपेक्षया मातुः प्रथममधिकार इति विज्ञानेश्वरादयो वदन्ति।
गृहस्थाश्रमप्रकरणेऽपि नारीणां स्थानं वर्णितम्। गृहमित्युक्ते गृहिणी धर्मशास्त्रानुसारमेव बोध्यते। गृहस्थस्य कृते नार्या भूमिका महत्त्वपूर्णा। नारीं विहाय गृहस्थाश्रमस्य परिकल्पनाऽपि कर्तुं नैव शक्यत इत्यपि स्मृतिषु प्रतिपादितम्। प्रायश्चित्ताध्यायस्य अशौचप्रकरणे नारीणां स्थानमिति प्रसङ्गमङ्गीकृत्यालोच्यते यत्–

एवं मातामहाचार्यप्रेतानामुदकक्रिया।
कामोदकं सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजाम्॥[25] इति।

अस्मादेव याज्ञवल्क्यवचनाद् ज्ञायते यथा सगोत्रसपिण्डानां प्रेतानामुदक-क्रिया अनुष्ठीयते तथैव मातामहानामित्यत्र प्रत्तानामर्थात् परिणीतानां भगिन्यादीनामपि एषोदकक्रिया विधीयते।
किञ्चापि मरणाशौचापेक्षया जननाशौचे पितुरपेक्षया मातुः प्राधान्यं प्रदत्तं यत् याज्ञवल्क्येनोक्तं- 'सूतकं मातुरेव हि' पुनश्च 'उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्[26] इति। याज्ञवल्क्यवचनेन रजस्वला-शवचण्डालपतितसूतिकाद्याः शावाशौचिनश्चैतैः संस्पृष्टः स्नानमाचरेत्।
गर्भाधारणप्रसङ्गेऽपि स्त्रीपुंसयोः संयोगे योनौ रजसाभिसंसृष्टं शुक्रं तत्क्षणमेव सह भूतात्मना गुणैश्च सत्वरजस्तमोभिः सह वायुना प्रेर्यमाणं गर्भाशये तिष्ठतीत्यत्रापि नार्याः प्राधान्यमेव याज्ञवल्क्येन प्रत्यपादि। यथा —

स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते।
पञ्चधातून् स्वयं षष्ठ आदत्ते युगवत्प्रभुः॥[27] इति।

प्रसङ्गेऽस्मिन् कानिचिदुदाहरणानि प्रदाय इदानीं मनुस्मृतौ प्रतिपादिता-न्युदाहरणानि प्रतिपाद्यन्ते। यत्र नारीणां समादरस्तत्रैव सर्वक्रियाणां साफल्यम्। तदभावे तु सर्वकृत्यानां निष्फलत्वम्। यतो मनुः–

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥[28] इति।

अत एव नारीणां भूषणाच्छादनादिभिः सततमेव सत्क्रिया विधेया। यदुक्तम्-

स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम्।
तस्यां त्वरोचमानायां सर्वमेव न रोचते॥[29] इति।

योषिति सन्तुष्टिमुपागतायां प्रसन्नायां च सत्यां तत्कुलं रोचते वर्धते च तदभावे न कुलश्रीवृद्धिः। अत एव मनुना व्यादिष्यते यद्यत्र दम्पत्योः सामञ्जस्यं परस्परं सन्तुष्टिश्च तत्रैव कल्याणाधिवासः। यथा मनुः-

सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥[30] इति।

स्त्रियो हि रत्नस्वरूपाः। अतः स्त्रीरत्नं दुष्कुलादपि ग्राह्यम्। 'स्त्रीरत्नं दुष्कुलादपि' मनुवचनादवगम्यते। स्त्रीणां महत्त्वं प्रेक्ष्यैव मनुनोच्यते स्त्रियो रत्नाति विद्या धर्मश्च यत्रैव प्राप्येरन् तत एवादेयानीति। किञ्चान्ते नारी पुरुषार्थसाधिनीत्यपि स्मृतिषु प्राप्यते–

यदा भर्त्ता च भार्या च परस्परवशानुगौ।
तदा धर्मार्थकामानां त्रयाणामपि सङ्गतम्॥[31] इति।

एवं प्रकारेण धर्मशास्त्रीय सिद्धान्ताधारेण पुराणसाहित्याधारेण च विविधानि काव्यानि अपि नारीणां वैशिष्ट्याधारेण निर्दिशति। काव्यप्रकाशकारेण आचार्यमम्मटेन काव्यप्रयोजननिरूपणवेलायां वक्ति यत् काव्यं सहृदयानां कृते कान्तासम्मिततयोपदेशं ददाति। काव्यप्रकाशः 1. 2 इयं च नारी कदाचित् सहधर्मिणी रूपेण, कदाचित् मातृरूपेण, कदाचित् मित्ररूपेण च पुरुषस्य उपकारसाधनं करोति। सा भोजनकाले मातृकार्यं करोति। कार्याकार्यविचारवेलायां मन्त्रणं प्रदाय मन्त्रिकार्यं करोति। पतिसेवाकाले दासीरूपेण व्यवहरति। यथोक्तम् –

कार्येषु मन्त्री करणेषु दासी भोज्येषु माता शयनेषु रम्भा।
धर्मेऽनुकूला क्षमया धरित्री भार्या च षड्गुण्यवतीह दुर्लभा॥[32] इति।

रामायणे महाभारते च नारीणां महत्वं वर्णितं वर्तते। रामायणानुसारेण कौशल्या तारा च द्वे मन्त्रविद्रूपेण परिचीयेते। महाभारते द्रौपदी पण्डिता स्त्रीरूपेण वण्यते। नारीणां संगीतनृत्यादिकलानैपुण्यमपि वर्ण्यते। नारीणां गौरवाधारेण महाभारतगतानि कानिचन पद्यानि प्रस्तुयन्ते यथा-

अर्धभार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा।
भार्या मूलं त्रिवर्गश्च भार्या मूलं तरिष्यतः॥
भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः।
भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विताः॥
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः।
पुरा नार्यः पुरुषतुल्यमधिकारान्हि लेभिरे॥[33]

वस्तुतः नारी सर्वदा सर्जनात्मिका शक्तिरूपा च वर्तते। जगद्भ्रमोत्पादिका मायाशक्तिरपि नारीरूपेणैवाकल्यते भारतीयविद्वद्भिः। स्त्रियः समस्तास्तव देवि भेदाः इति वचनानुसारेण सर्वाः अपि स्त्रियः महामायायः आद्यशक्तेः स्वरूपेणैव प्रतिपादिताः सन्ति। नारीणां सम्माननं पूजनं च यस्मिन् समाजे वर्तते तत्र सर्वत्र सर्वाः देवताः नितरां रमन्ते अन्यथा सर्वाः अपि क्रियाः विफलतां यान्तीति भारतीयसंस्कृतेः निर्देशो वर्तते। अतः सप्रमाणम् उच्यते –

यत्र नार्यस्तु पुज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥[34] इति।

अनया पर्यालोचनया ज्ञायते यत् प्राचीनभारते स्त्रीणां स्थानम् अतीव महत्त्वपूर्णमासीत्। वैदिकसाहित्यमिव धर्मशास्त्रीयसाहित्येऽपि नारीणां सुमहत्तरं स्थानं प्रतिपादितमस्ति। रामायणमहाभारतादिषु अपि ताषां सम्माननं नितरामवलोक्यते। काव्यानि नाटकानि च नारीसमाजस्य वर्णनपरायणानि अवलोक्यन्ते। अतः संस्कृतसाहित्ये सर्वत्र एव नारीणां महत्त्वं वर्णितं दृश्यते इति शम्।

**सन्दर्भाः**

1. पञ्च. 3/146
2. ऋग्. 10/85/46
3. अथर्व. 20/126/10
4. अथर्व 20/126/9
5. मनु. 2/10)
6. याज्ञ. 1/4/5
7. परा. स्मृ. 25
8. मनु. 1/32
9. मनु. 2/33
10. याज्ञ. 1/39
11. मनु. 2/50
12. मनु. 2/67
13. याज्ञ. 1/63
14. याज्ञ. 1/70
15. याज्ञ. 1/71
16. मनु. 2/129
17. याज्ञ. 1/75
18. याज्ञ. 1/77
19. याज्ञ. 1/243
20. याज्ञ. 1/254
21. नारदस्मृतिः।
22. मनु. 8/416
23. मनु. 9/3
24. मनु 9/168
25. प्रायश्चि. 3/4
26. याज्ञ. 3/30
27. याज्ञ. 3/73
28. मनु. 3/53
29. मनु. 3/62
30. मनु. 3/60
31. म.स्मृ. 3/2
32. सु.र.भा. 351/27
33. महाभारतम्
34. मनु. 3/56